
सीता—भअवदि तमसे अयं दाव ईरिसो जादो । दे उण ण आणामि कुसलवा एत्तिएण कालेण केरिसा संवुत्तेत्ति । [भगवति तमसे अयं तावदीदृशो जातः । तौ पुनर्न जानामि कुशलवावेतावता कालेन कीदृशौ संवृत्ताविति ।]

तमसा—यादृशोऽयं तादृशौ तावपि ।

सीता—ईरिसी अहं मन्दभाइणी जाए ण केवलं णिस्सहो अज्जउत्त-विरहो पुत्तविरहो वि । [ईदृश्यहं मन्दभागिनी यस्या न केवलं निःसह आर्य-पुत्रविरहः पुत्रविरहोऽपि ।]

तमसा—भवितव्यतेयमीदृशी ।

Vasanti—(Observing) My lord! Rejoce at the victory of the queen's pet in the company of his mate.

Rama—May the long-lived one be victorious!

Sita—Good heavens! Is my pet grown so strong?

Rama—O queen, you are to be congratulated.

O fair lady, this son of thine—the conqueror of elephants in rut, enjoys every blessing that is to be desired in youth; the same son who used to pull off the sprouts of Lavali creeper from your ears, with his tender tusk smooth like the fibre of a louts stalk newly put forth (15)

Sita—May he live long and may he not be separated from his gentle mate.

Rama—Dear Vasanti, just observe how our pet has learnt the art of courting his beloved.

For, after giving his mate morsels of lotus-stalks sportively uprooted, he has supplied her with water scented with blooming lotuses, taking it out from his own mouth; after this he has indeed poured a shower of spray from his trunk and then lastly he affectionately holds over her a lotus leaf, with a straight stalk, to serve as an umbrella. (16)

Sita—Revered Tamasa; he has grown so large, cant say, how big Kusha and Lava must have grown by this time.

Tamasa—Those too must have grown just as this pet has grown.

Sita—How wretched am I, I who am undergoing separation not only from my lord but from my sons too.

Tamasa—Such is the decree of fate.

सीता—किंवा मए पसूदाए जेण तारिसंपि मह पुत्तआणं ईसिविरल-कोमलधवलदसणुज्जलकवोलं अणुबद्धमुद्धकाअलीविहसिदं णिबद्धकाअसिहण्डअं अमलमुहपुण्डरीअजुअलं ण परिचुम्बिअं अज्जउत्तेण। [किं वा मया प्रसूतया येन तादृशमपि मम पुत्रकयोरीषद्विरलकोमलधवलदशनोज्ज्वलकपोलमनुबद्धमुग्धकाकलीविहसितं निबद्धकाकशिखण्डकममलमुखपुण्डरीकयुगलं न परिचुम्बितमार्यपुत्रेण।]

तमसा—अस्तु देवताप्रसादात्।

सीता—भअवदि तमसे एदिणा अवच्चसंसुमरणेण उस्ससिदपण्हुदत्थणी दाणिं वच्चाणं पिदुणो संणिहाणेण खणमेत्तं संसारिणीह्मि संवुत्ता। [भगवति तमसे एतेनापत्यसंस्मरणेनोच्छ्वसितप्रस्नुतस्तनी इदानीं वत्सयोः पितुः संनिधानेन क्षणमात्रं संसारिण्यस्मि संवृत्ता।]

तमसा—किमत्रोच्यते। प्रसवः खलु प्रकर्षपर्यन्तः स्नेहस्य। परं चैतदन्योन्यसंश्लेषणं पित्रोः।

अन्तःकरणतत्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते॥ १७॥

वासन्ती—इतोऽपि देवः पश्यतु।

अनुदिवसमवर्धयत् प्रिया ते
यमचिरनिर्गतमुग्धलोलबर्हम्।
मणिमुकुट इवोच्छिखः कदम्बे
नदति स एष वधूसखः शिखण्डी॥ १८॥

सीता—(सकौतुकस्नेहास्रम्) एसो सो एसो सो [एष स एष सः।]

रामः—मोदस्व वत्स मोदस्व।

सीता—एव्वं होदु। [एवं भवतु।]

रामः—भ्रमिषु कृतपुटान्तर्मण्डलावृत्तिचक्षुः
प्रचलितचटुलभ्रूताण्डवैर्मण्डयन्त्या।
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन स्मरामि॥ १९

हन्त तिर्यञ्चो ऽपि परिचयमनुरुध्यन्ते।

कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्धितोऽयमासीत्।

Sita—What is the good of my giving birth to sons? Since my lord did not so much as kiss their pure lotus like faces—faces charming by their thin little tender teeth and white cheeks-faces-charming by the smile accompanied by sweet-prattle and decorated with locks?

Tamsa—May that come about by the favour of God.

Sita—Revered Tamasa—the recollection of my children makes my breasts throb and flow with milk; and by the proximity of their father I feel as if I am a householder for the time being.

Tamsa—Need this be said? An offspring is the highest limit in the course of love It is the most powerful link that joins the parents together.

> This, what we call an offspring, is said to be the tying knot of the hearts of parents; in it is centered their affection. (17)

Vasanti—May your majesty look this way.

> Here is the peacock in the company of his mate uttering a cry; with his crest raised up he looks like a diadem of jewels on the Kadamba tree. This is the peacock whom, with his newly fledged feathers beautifully waving, your beloved wife nourished day by day. (18)

Sita—(With admiration and tears of affection) It is the same, it is tha same.

Rama—Enjoy, child, enjoy.

Sita—Be it so,

Rama—

> With a parent's heart I remember thee, as I would (remember) my son. I remember how my fair wife made you dance, keeping time by clapping her hands; she added to your charm by the quick and charming play of her eyebrows, and the movement of her eyeballs in their sockets, as you moved round. (19)

Alas! Even animals hold fast to friendships.
This Kadamb tree which has put forth a few flowers was reared by my darling.

सीता—(निरूप्य सास्रम्।) सुट्ठु पच्चहिआणिदं अज्जउत्तेण। [सुष्ठु प्रत्यभिज्ञातमार्यपुत्रेण।

रामः—स्मरति गिरिमयूर एष देव्याः
स्वजन इवात्र यतः प्रमोदमेति॥२०॥

वासन्ती—अत्र तावदासनपरिग्रहं करोतु देवः।
(राम उपाविशति।)

वासन्ती—
नीरन्ध्रबालकदलीवनमध्यवर्ति
कान्तासखस्य शयनीयशिलातलं ते।
अत्र स्थिता तृणमदाद्बहुशो यदेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म॥ २१॥

रामः—इदं तावदशक्यमव द्रष्टुम। (इत्यन्यतो रुदन्नुपविशति।)

सीता—सहि वासन्दि किं तुए किदं अज्जउत्तस्स मह अ एदं दंसअन्तीए। हद्धी हद्धी। सो जेव्व अज्जउत्तो तं जेव्व पञ्चवडीवणं सा जेव्व पिअसही वासन्दी दे जेव्व विविहविस्सम्भसक्खिणो गोदावरीकाणणुद्देसा दे जेव्व जादणिव्विसेसा मिअपक्खिपादवा सा जेव्व चाहम्। मह उण मन्दभाइणीए दीसन्तं वि सव्वं जेव्व एदं णत्थि त्ति सा ईरिसो जीवलोअस्स परिणामो संवुत्तो। [सखि वासन्ति किं त्वया कृतमार्यपुत्रस्य मम चैतद्दर्शयन्त्या। हा धिक् हा धिक्। स एवार्यपुत्रस्तदेव पञ्चवटीवनं सैव प्रियसखी वासन्ती त एव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशास्त एव जातनिर्विशेषा मृगपाक्षिपादपाः सैव चाहम्। मम पुनर्मन्दभाग्याया दृश्यमानमपि सर्वमेवैतन्नास्तीति तदीदृशो जीवलोकस्य परिणामः संवृत्तः।]

वासन्ती—सखि सीते कथं न पश्यसि रामभद्रस्यावस्थाम्।

नवकुवलयस्निग्धैरङ्गैर्ददन्नयनोत्सवं
सततमपि नः स्वेच्छादृश्यो नवो नव एव यः।
विकलकरणः पाण्डुच्छायः शुचा परिदुर्बलः
कथमपि स इत्युन्नेतव्यस्तथापि दृशोः प्रियः॥ २२॥

सीता—पेक्खामि सहि पेक्खामि। [प्रेक्षे सखि प्रेक्षे।]

तमसा—पश्यन्ती प्रियं भूयाः।

Sita—(Observing it with tears) My lord has rightly recognised it.

Rama—

Since he takes delight here, as in the company of a relation this peacock on the mountain seems to remember my wife. (20)

Vasanti—May your lordship sit here.

(Rama sits down).

Here is the slab of stone in the midst of a thick plantain grove, on which you used to recline in the company of your beloved; it is not deserted by the deer even now since Sita often used to sit here and feed them with grass. (21)

Rama—I cannot bear even to look at this.

(Weeps and sits down in another place.)

Sita—Friend Vasanti, in showing this, what have you done unto me and my husband ? Alas ! Alas ! Here is my husband as before, this is the very same forest of Panchavati, the very same dear friend Vashnti; these are the same tracts of the forest of Godavari, witnesses to our various confidences; the same indeed are the deer, the birds and the trees; not at all different to us from our children ; I am the same, but all tbis, though seen, has ceased to exist for me, an unfortunate woman : such then has been the change in this world of mortals !

Vasanti—Dear Sita, don't you see the condition to which Rama is reduced ?

With limbs lovely like a fresh blue lotus, his sight was (as it were) a feast to the eye; though seen constantly and at will, every time (we saw) he presented newness to the eye. With his body imaciated through grief, his senses distracted, even his identification has become difficult and yet he is charming to the eye.(22)

Sita—I see it, friend I do see it.

Tamasa—May you enjoy for ever the sight of him who is dearest to you.

सीता—हा देव्व एसो मए विणा अहं वि एदेण विणोत्ति सिविणेपि केण संभाविदं आसि। ता मुहुत्तमेत्तं जम्मन्तरादो विअ लद्धदंसणं बाहसलिलन्तरेषु पेक्खामि दाव वच्छलं अज्जउत्तम्। (इति पश्यन्ती स्थिता।) [हा दैव एष मया विना अहमप्येतेन विनेति स्वप्नेपि केन सम्भावितमासीत्। तन्मुहूर्तमात्रं जन्मान्तरादिव लब्धदर्शनं बाष्पसलिलान्तरेषु प्रेक्षे तावद्वत्सलमार्यपुत्रम्।]

तमसा—(परिष्वज्य सास्रम्।)

विलुलितमतिपूरैर्बाष्पमानन्दशोक-
प्रभवमवसृजन्ती पक्ष्मलोत्तानदीर्घा।
स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलमधुरमुग्धा दुग्धकुल्येव दृष्टिः ॥ २३ ॥

वासन्ती—ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः।
कमलविरलं रज्यत्कंठाः क्वणन्तु शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वनमागतः ॥ २४ ॥

रामः—एहि सखि वासन्ति नन्वितः स्थीयताम्।

वासन्ती—(उपाविश्य सास्रम्) महाराज अपि कुशलं कुमारलक्ष्मणस्य।

रामः—(अश्रुतिमभिनीय।)

करकमलवितीर्णैरम्बुनीवारशष्पै-
स्तरुशकुनिकुरङ्गान्मैथिली यानपुष्यत्।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्यः ॥२५॥

वासन्ती—महाराज ननु पृच्छामि अपि कुशलं कुमारलक्ष्मणस्येति।

रामः—(आत्मगतम्।) अये महाराजेति निष्प्रणयमामन्त्रणपदं सौमित्रिमात्रे च बाष्पस्खलिताक्षरः कुशलप्रश्नः। तथा मन्ये विदितसीतावृत्तान्तेयमिति। (प्रकाशम्) आं कुशलं कुमारस्य।

वासन्ती—(रुदती।) अयि देव किं परं दारुणः खल्वसि।

सीता—सहि वासन्दि किं तुमं एव्वंवादिणी होसि। पिआरुहो क्खु सव्वस्स अज्जउत्तो विसेसदो मह पिअसहीए। [सखि वासन्ति किं त्वमेवंवादिनी भवसि। प्रियार्हः खलु सर्वस्यार्यपुत्रो विशेषतो मम प्रियसख्याः।]

Sita—Alas ! O fate ! Who could have imagined even in a dream that I could be separated from him and he from me. So let me have a look at my loving husband, even though for a moment, at intervals between floods of tears; his sight is being obtained as if through rebirth.

Tamasa—(Clasping her with tears).

Your eyes of long eyelashes, opened wide and shedding tears of joy and grief that fall tremulousty, pouring forth affection, bathe, as it were, the lord of your heart, with a stream of milk white, sweet and beautiful. (23)

Vasanti—

Let trees yield honey and make an offering of flowers and fruit; let the breezes in the wood carrying fragrance of full bloom lotuses, blow gently ; let the birds with melodious tunes sing sweetly and unceasingly ; for, King Rama himself has come to this forest once again. (24)

Rama—Come friend Vasanti, sit here.

Vasanti—(sitting down; with tears) Great King, is prince Lakshamana well ?

Rama—(not hearing), On seeing the trees birds and deer, which Maithili tended with water, grain (Nivar) and young grass, given with her lotus like hand; a strange sensa tion comes over me, which is as it were a flow of the melted heart, capable of breaking even a stone. (25)

Vasanti—Your majesty, I ask if prince Lakshmana is doing well.

Rama—(To himself) Ha ! She addressed me as " Your Majesty " a formal mode of address, and about the well being of Lakshman alone, with accents faltering owing to tears. Methinks she knows the account of Sita. (Aloud) Ah! Prince Laksh- mana is well.

Vasanti—(Weeping) My lord why are you so cruel ?

Sita—Friend Vasanti ! Why dost thou speak to him in this way ? My noble lord deserves kind words from every one, especially from my dear friend.

वासन्ती—त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमिहोत्तरेण ॥२६॥

(इति मुह्यति ।)

तमसा—स्थाने वाक्यनिवृत्तिर्मोहश्च ।

रामः—सखि समाश्वसिहि समाश्वसिहि ।

वासन्ती—(समाश्वस्य ।)तत्किमिदमकार्यमनुष्ठितं देवेन !

सीता—सहि वासन्दि विरम विरम ।[सखि वासन्ति विरम विरम ।]

रामः—लोको न मृष्यतीति ।

वासन्ती—कस्य हेतोः ।

रामः—स एव जानाति किमपि ।

तमसा—उचितस्तदुपालम्भः ।

वासन्ती—अयि कठोर यशः किल ते प्रियं
किमयशो ननु घोरमतः परम्
किमभवद्विपिने हरिणीदृशः
कथय नाथ कथं बत मन्यसे ॥२७॥

सीता—तुमं जेव्व सहि वासन्दि दारुणा कठोरा अ जा एव्वं अज्जउत्तं पलित्तं पदीवेसि । [त्वमेव सखि वासन्ति दारुणा कठोरा च यैवमार्यपुत्रं प्रदीप्तं प्रदीपयसि ।]

तमसा—प्रणय एवं व्याहरति शोकश्च ।

रामः—सखि किमत्र मन्तव्यम् ।

त्रस्तैकहायनकुरङ्गविलोलदृष्टे-
स्तस्याः परिस्फुरितगर्भभरालसायाः ।
ज्योत्स्नामयीव मृदुबालमृणालकल्पा
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ॥२८॥

सीता—अज्जउत्त धरामि एसा धरामि । [आर्यपुत्र ध्रिये एषा ध्रिये।

रामः—हा प्रिये जानकि क्वासि ।

Vasanti—

"Thou art my life, my second soul, the moonlight of my eyes, an ambrosia to my body". With these and hundreds of such endearing expressions you flattered that artless one and that same thou! but enough! Why say more. (26)

(She faints).

Tamasa—The break in the speech and the swoon are the most natural, under the circumstances.

Rama—Take heart, friend, compose thyself.

Vasanti—(Regaining consciousness) Why then was this unworthy act done by your majesty?

Sita—Dear Vasanti, cease O cease.

Rama—Because the people could not tolerate it.

Vasanti—Why for?

Rama—They themselves might know.

Tamasa—A rebuke is the right thing for them.

Vasanti—O hard-hearted one, fame, indeed, is dearer to thee; but can any infamy be more dreadful than this? What became of the deer-eyed one in the forest? Say, my lord, What dost thou think? (27)

Sita—Dear Vasanti, thou art cruel, thou art terrible, thou who excitest my lord who is already afflicted.

Tamasa—Nay, it is love and grief that speak thus.

Rama—What is there to think of, in this matter.

Verily, she with her creeper-like body, soft like a tender lotus stalk, her body which was as it were made of moonlight itself; she with her gait, slow on account of the weight of the throbbing phoetus; she with her eyes unsteady like that of a fawn, just a year old, must have been destroyed by the wild beasts. (28)

Sita—My lord, I am alive.

Rama—O, dear Janaki, where art thou?

सीता—हद्धी हद्धी। अण्णो विअ अज्जउत्तो पमुक्ककण्ठं रोइदि। [हा धिक् हा धिक्। अन्य इवार्यपुत्रः प्रमुक्तकण्ठ रोदिति।]

तमसा—वत्से सांप्रतिकमेवैतत्। कर्तव्यानि खलु दुःखितैर्दुःखनिर्वापणानि।

पूरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया।
शोकक्षोभे च हृदयं प्रलापैरेव धार्यते॥ २९॥

विशेषतो रामभद्रस्य बहुप्रकारकष्टो जीवलोकः।

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोको जीवं कुसुममिव घर्मो ग्लपयति।
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-
स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम्॥३०॥

रामः—कष्टं भोः कष्टम्।

दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसा-
त्प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्॥ ३१॥

सीता—एवं ण्णेदं। [एवं न्विदम्।]

रामः—हे भवन्तः पौरजानपदाः।

न किल भवतां देव्याः स्थानं गृहेऽभिमतं तत-
स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता।
चिरपरिचितास्ते ते भावाः परिद्रवयन्ति मा-
मिदमशरणैरद्यास्माभिः प्रसीदत रुद्यते॥ ३२॥

तमसा—(स्वगतम्।) अतिगंभीरमापूरणं मन्युसम्भारस्य। देव अतिक्रान्ते धैर्यमवलम्ब्यताम्।

वासन्ती—(प्रकाशम्)

रामः—सखि किमुच्यते धैर्यमिति।

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः।
प्रनष्टमिव नामापि न च रामो न जीवति॥ ३३॥

सीता—मोहिदह्मि एदेहिं अज्जउत्तवअणेहिं। [मोहितास्म्येतैरार्यपुत्रवचनैः।]

तमसा—एवमेव वत्से।

Sita—Alas! Alas! My lord weeps like a common man.

Tamasa—Dear child, it is but common The grieved must give vent to their grief.

When a tank is floodded, an outlet is the only remedy.When the mind is agitated by sorrow it can be appeased only by lamentations. This is particularly the case with gentle Rama to whom life has been exceedingly painful in many ways. (29)

He has to govern with a vigilant mind, the world according to law; grief for his beloved wife oppresses his mind like a flower by heat; even the relief that one finds in lamentations is denied to him, himself having abandoned his wife; now that there are outbursts of passion, weeping is a distinct gain. (30)

Rama—Alas! Alas!

My heart though crushed under deep agitation does not break into two: My feeble body subject to swoons does not lose consciousness. The burning sensation within, consumes the body but does not reduce it to ashes. The fate strikes the vital parts but does not take away life. (31)

Sita—Indeed, it is so.

Rama—O worthy citizens!

You did not like that the queen should have a place in the house and I abandoned her in a lonely forest like a blade of grass, even without manifestations of grief. Those various objects long familiar to me move my heart and I weep helplessly to-day. I hope you will pardon me. (32)

Vasanti—(To herself) O, what a storm in the ocean of sorrow! (aloued) My lord take courage; these are past things.

Rama—Friend what say you, courage!

It is now the twelfth year since the absence of Sita from this world; her very name is forgotten but Rama is still alive. (33)

Sita—I am charmed by these words of my lord.

Tamasa—It is like this my child. These kind words can not be pleasant to you, proceeding as they do from grief. These streams of honey pour poison over you.

नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः ।
एतास्ता मधुनो धाराः श्च्योतन्ति सविषास्त्वयि ॥३४॥

रामः—अयि वासन्ति मया खलु

यथा तिरश्चीनमलातशल्यं
प्रत्युप्तमन्तः सविषश्च दंशः ।
तथैव तीव्रो हृदि शोकशङ्कु-
र्मर्माणि कृन्तन्नपि किं न सोढः ॥ ३५ ॥

सीता—एव्वं ह्मि मन्दभाइणी पुणोवि आआसआरिणी अज्जउतस्स । [एवमस्मि मन्दभागिनी पुनरप्यायासकारिणी आर्यपुत्रस्य ।]

रामः—एवमतिनिष्कम्पस्तम्भितान्तःकरणस्यापि मम संस्तुततत्तत्प्रियवस्तु-दर्शनादुद्दामोयमावेगः । तथाहि ।

वेलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि मया धीयते तं तमन्तः ।
भित्वा भित्वा प्रसरति बलात्कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥ ३६ ॥

सीता—एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुःखसंखोएण परिमुसिआणिअदुक्खं किंपि पमुद्धं मे हिअअं । [एतेनार्यपुत्रस्य दुर्वारदारुणारम्भेण दुःखसंक्षोभेण परिमुषितनिजदुःखं किमपि प्रमुग्धं मे हृदयम् ।]

वासन्ती—(स्वगतम् ।) कष्टमभ्यापन्नो देवः । तदन्यतः क्षिपामि तावत् । (प्रकाशम् ।) चिरपरिचितानिदानीं जनस्थानभागानवलोकनेन मानयतु देवः ।

रामः—एवमस्तु । (इत्युत्थाय परिक्रामति ।)

सीता—संदीवण जेव्व दुक्खस्स पिअसहाए विणोदणोवाओत्ति तक्केमि । (संदीपन एव दुःखस्य प्रियसख्या विनोदनोपाय इति तर्कयामि ।]

वासन्ती—(सकरुणम् ।) देव देव

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद्गोदावरीसैकते ।
आयान्त्या परिदूर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ॥३७॥

Rama—O Vasanti!

Have I not borne in my heart a pointed shaft of grief, piercing the vitals, like a red-hot javelin thrust deep into my heart, like a wound caused by a venomous bite. (35)

Sita—How unlucky am I that I should be a cause of trouble to my lord once more?

Rama—Though I have controlled my heart so firmly at the sight of those various objects, that were once dear and familiar to me, I experience a sensation that is over-powering.

Since.

Every effort, however strenuous, I make to check the outburst of the emotion of grief that knows no bounds, is defeated and some indescribable passion overwhelms me and spreads like a volume of water rushing with irrisistible velocity, breaking through a dam of sand. (36)

Sita—This outburst of grief in my lord, the grief so violent in its inception and so difficult to check, makes me forget my own and bewilders me.

Vasanti—(To herself) My lord is greatly distracted. I will make a diversion. (Aloud) Let my lord honour these parts of Janasthan, long familiar to him, by looking at them.

Rama—As you please. (With these words he rises and walks about).

Sita—I am afraid, the attempts, that my dear friend makes, to relieve his pain are likeiy to inflame it.

Vasanti—(Feelingly) Sir, O Sir,

It was here in this very bower of creepers that you eagerly watched her coming while she stayed long on the sands of Godavari, playing with swans. It was here that when she returned and observed that you were a little distracted that she timidly folded her hands which looked like a bud of lotus. (37)

सीता—दालुणासि वासान्ति दालुणासि । जा एदोहिं हिअअमम्मगूढसल्ल-संघट्टणेहिं पुणो पुणोवि मं मन्दभाइणिं अज्जउत्तं अ संदावेसि । [दारुणासि वासन्ति दारुणासि । या एतैर्हृदयमर्मगूढशल्यसंघट्टनैः पुनःपुनरपि मां मन्द भागिनीमार्यपुत्रं च सन्तापयासि ।]

राम—अयि चाण्डि जानकि इतस्ततो दृश्यस्य इव नानुकम्पसे ।

हा हा देवि स्फुटति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥ ३८ ॥

(इति मूर्च्छति)

सीता—हद्धी हद्धी पुणोवि पमूढो अज्जउत्तो । (हा धिक् हा धिक् पुनरपि प्रमूढ आर्यपुत्रः ।

वासन्ती—देव समाश्वसिहि समाश्वसिहि ।

सीता—अज्जउत्त मं मन्दभाइणिं उद्दिसिअ सअलजीवलोअमङ्गलाधारस्स दे वारंवारं संसइदजीविअदालुणो दसापरिणामो त्ति हा दहम्हि । (इति मूर्च्छति ।) [आर्यपुत्र मां मन्दभागिनीमुद्दिश्य सकलजीवलोकमङ्गलाधारस्य ते वारंवारं संशयितजीवितदारुणो दशापरिणाम इति हा हतास्मि ।]

तमसा—वत्से समाश्वासिहि समाश्वसिहि । पुनस्त्वत्पाणिस्पर्श एव सञ्जीवनोपायो रामभद्रस्य ।

वासन्ती—कथमद्यापि नोच्छवसिति । हा प्रियसखि सीते क्वासि सम्भावयात्मनो जीवितेश्वरम् ।

(सीता ससंभ्रममुपसृत्य हृदि ललाटे च स्पृशति ।)

वासन्ती—दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः ।

रामः—
आलिम्पन्नमृतमयैरिव प्रलेपै-
रन्तर्वा बहिरपि वा शरीरधातून् ।
संस्पर्शः पुनरपि जीवयन्नकस्मा-
दानन्दादपरमिवादधाति मोहम् ॥ ३९ ॥

(आनन्दनिमीलिताक्ष एव) सखि वासन्ति दिष्ट्या वर्धसे ।

वासन्ती—देव कथमिव ।

रामः—सखि किमन्यत् । पुनः प्राप्ता जानकी ।

वासन्ती—अयि देव रामभद्र क्व सा ।

Sita—How cruel, Vasanti! How cruel!

You simply pain my wretched self and my noble lord over and over again by your shaking (as it were) the shaft of grief rooted deep in the vitals of the heart.

Rama—O, relentless Janaki. I feel as if I see you here, I see you there. But thou wilst not take compassion on me.

> Alas! Alas! My queen, my heart bursts; the frame of my body is disjointed; the world to me is an empty void; inwardly I am burning incessantly; my heart sinks within me helplessly and I feel as if I am engulfed in unfathomable darkness; (a kind of) infatuatian paralyses me completely; wretched as I feel myself I scarcely know how to act. (Faints). (38)

Sita—Alas! Alas! My lord has fainted again.

Vasanti—My lord! Take comtort; take comfort.

Sita—My lord, often and often are you subjected to a condition of mind in which your very life is in danger, your life which is the support of the welfare of the whole world. (faints again).

Tamasa—Child, take heart, take heart. The touch of your hand alone is the remedy to revive dear Rama.

Vasanti—How now! He does not recover yet! Ah! Dear Sita! Where art thou? Revive the lord of your life.

(Sita hurriedly approaches Rama and touches him on the heart and forehead).

Vasanti—How glad! Dear Rama has recovered.

Rama—

> This touch, all of a sudden, applying (as it were) some ambrosial ointment to tbe constituants of my body, within and without, revives me and through joy induces a kind of stuper. Friend Vasanti, thou art fortunate.

Vasanti—How? My lord,

Rama—Friend, what else? Janaki has been restored.

Vasanti—Oh, my lord! Where is she?

रामः–(स्पर्शसुखमभिनीय ।) पश्य नन्वियं पुरत एव ।

वासन्ती–अयि देव किमिति मर्मच्छेददारुणैरेभिः प्रलापैः प्रियसखीदुःख-दग्धामपि मां पुनर्मन्दभाग्यां दहसि ।

सीता–ओसरिदुं इच्छम्मि । एसो उण चिरसब्भावसोम्मसीदलेण अज्जउत्त-प्फंसेण दीहदारुणं वि झत्ति संदावं हरन्तेण वज्जलेवोवणिवद्धोविअ सिज्जन्त णीसहविवल्हत्थो मेअणसीलो अवसो विअ मे हत्थो । [अपसर्तुमिच्छामि । एष पुनः चिरसद्भावसौम्यशीतलेन आर्यपुत्रस्पर्शेन दीर्घदारुणमपि झटिति सन्तापं हरता वज्रलेपोपनिबद्ध इव स्विद्यन्निःसहविपर्यस्तो वेपनशीलोऽवश इव मे हस्तः ।]

रामः–सखि कुतः प्रलापाः ।

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधरः
सुधासूतेः पादैरमृतशिशिरैर्यः परिचितः ।

सीता–अज्जउत्त सो जेव्व दाणिं सि तुमं । [आर्यपुत्र स एवेदानीमसि त्वम् ।]

रामः–स एवायं तस्यास्तुहिनानिकरौपम्यसुभगो
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥ ४० ॥

(इति गृह्णाति !)

सीताः—हद्धी हद्धी । अज्जउत्तप्फंसमोहिदाए पमादो क्खु मे संवुत्तो । [हा धिक् हा धिक् । आर्यपुत्रस्पर्शमोहितायाः प्रमादः खलु मे संवृत्तः ।]

रामः—सखि वासन्ति आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि तत्त्वं तावदेनां धारय ।

वासन्तीः—कष्टमुन्माद एव ।

(सीता ससंभ्रमं हस्तमाक्षिप्यापसर्पति ।)

रामः—हा धिक् प्रमादः ।

करपल्लवः स तस्याः सहसैव जडो जडात्परिभ्रष्टः ।
परिकम्पिनः प्रकम्पी करान्मम स्विद्यतः स्विद्यन् ॥४१॥

सीता—हद्धी हद्धी । अज्जवि अणवत्थिदत्थिमिदमूढघुण्णन्तणअणो ण पज्जवत्थावेदि अत्ताणअं । [हा धिक् हा धिक् । अद्याप्यनवस्थितस्तिमितमूढ-घूर्णन्नयनो न पर्यवस्थापयत्यात्मानम् ।]

Rama—(Jesticulates the plesasure of her touch. See, she is just in front.

Vasanti—My lord, how do you dare burn me with these words, these terrible ravings that pierce the vitals. I am already scorched by the grief for my dear friend, unfortunate as I am.

Sita—I wish to withdraw (my hand) but it is, as it were fastened with adamantine cement; it is perspiring; it has become languid and is utterly ·powerless on account of the touch of my noble lord, which is cool and refreshing owing to abiding love, and has quickly assuaged my long and terrible sorrow.

Rama—Friend, how can it be a raving ?

This is that hand, with the wedding bracelets on, which, long ago was held by me at the marriage care-mony, the hand which was familiar to me by its ·cool and necterine touch. (40)

sita—My lord! thou art the same now.

Rama—That very same hand, beautiful like snowflakes and tender like a lavali shoot, has again been obtained by me (with these words he seizes it.)

sita—Alas ! Alas ! Charmed by the touch of my lord I have committed a blunder.

Rama–Friend Vasanti, with my senses paralysed through joy I have lost control over myself. You please take·hold of her.

Vasanti—Alas ! This is nothing but delirium.

(Sita quickly snatches away her hand and withdraws.)

Rama—Alas ! Alas ! What a blunder ?

That sprout–like (soft) hand benumbed, perspiring and trembling, has suddenly slipped away from mine which also is benumbed, moist and trembling. (41)

sita—Alas ! Alas ! With eyes now restless now still, at one time fixed, at another rolling, he is not yet able to compose himself.

तमसा—(सस्नेहकौतुकस्मितं निर्वर्ण्य ।

सस्वेदरोमाञ्चितकम्पिताङ्गी
जाता प्रियस्पर्शसुखेन वत्सा ।
मरुन्नवाम्भःप्रविधूतसिक्ता
कदम्बयष्टिः स्फुटकोरकेव ॥४२॥

सीता—(स्वागतम् ।) अम्महे अवसेन एदेण अत्ताणएण लज्जाविदम्हि भअवदीए तमसाए । किं त्ति किल एसा मण्णिस्सदि एसो परिच्चाओ एसो अहिसङ्गो त्ति । [अम्हहे अवशेनैतेनात्मना लज्जापितास्मि भगवत्या तमसया । किमिति किलैषा मंस्यत एष परित्याग एषोऽभिषङ्ग इति ।]

रामः—(सर्वतोऽवलोक्य ।) हा कथं नास्त्येव । नन्वकरुणे वैदेहि ।

सीता—सच्चं अकरुणह्मि जा एव्वंविहं तुमं पेक्खन्दी जीवेमि जेव्व । [सत्यमकरुणास्मि यैवंविधं त्वां प्रेक्षमाणा जीवाम्येव ।]

रामः—क्वासि देवि प्रसीद । न मामेवंविधं परित्यक्तुमर्हसि ।

सीता—अयि अज्जउत्त विप्पदीवं विअ एदं । [अयि आर्यपुत्र विप्रतीपमिवैतत् ।]

वासन्ती—देव प्रसीद प्रसीद । स्वेनैव लोकोत्तरेण धैर्येण संस्तम्भयातिभूमिं गतमात्मानम् । कुतोऽत्र मे प्रियसखी ।

रामः—व्यक्तं नास्त्येव कथमन्यथा वासन्त्यपि तां न पश्येत् । अपि खलु स्वप्न एष स्यात् । न चास्मि सुप्तः। कुतो रामस्य निद्रा । सर्वथा स एवैष भगवाननेकवारपरिकल्पनानिर्मितो विप्रलम्भः पुनः पुनरनुबध्नाति माम् ।

सीता—मए जेव्व दारुणाए विप्पलद्धो अज्जउत्तो । [मयैव दारुणया विप्रलब्ध आर्यपुत्रः ।]

वासन्ती—देव पश्य पश्य !

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथ-
स्ते चैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः ।
खड्गच्छिन्नजटायुपक्षतिरितः सीतां चलन्तीं वह-
न्नन्तर्व्याप्तविद्युदम्बुद इव द्यामभ्युदस्थादरिः ॥ ४३ ॥

सीता—(सभयम्) अज्जउत्त तादो वावादीअदि अहं वि अवहरिज्जामि । ता परित्ताहि । [आर्यपुत्र तातो व्यापाद्यते अहमप्यपह्रिये । तस्मात्परित्रायस्व ।]

(Looking at Sita with affection, admiration and smile)
With her body persrpiing, trembling, and the hair standing on end through joy, at the touch of her husband, my darling looks like the branch of a Kadamb tree shaken by the wind, washed by recent showers and with buds just appearing. (42)

Sita—(To herself). With, all control over myself lost, I feel ashamed in the presence of revered Tamasa. What indeed would she think of this affection and this repudiation ?

Rama—(Looking all round) What ! She is not here. Oh cruel Sita !

Sita—Indeed I am cruel, I who see thee in this condition and I yet live.

Rama—Oh queen ! Where art thou ? Be pleased. Thou oughtest not abandon me in my present condition.

Sita—My lord this is contrary to truth.

Vasanti—My lord, be calm. Your condition is very bad. Exert your control. Your own courage, which you possess in an uncommon degree, ought to help you. Whence could my dear friend be here ?

Rama—It is evident that she is not here; how could even Vasanti not see her ? I wonder whether it can be a dream. But then I was not asleep. How indeed could Rama sleep ? Undoubtedly this is a powerful delusion, the creation of my own imagination repeatedly indulged in, which haunts me over and over again.

Sita—It is I, a cruel woman, that has deluded my noble lord.

Vasanti—My lord see ! Here is Ravana's steel car smashed by Jatayu; here in front are those demon-faced donkeys reduced to skeletons; it was here that the enemy with his sword cut off the wings of Jatayu and rose high up in the sky carrying trembling Janaki like a cloud charged with lightening. (43)

Sita—(in terror) my noble lord ! Father Jatayu is being slain and I am being carried off. Help. O help.

रामः—(सावेगमुत्थाय) आः पाप तातप्राणसीतापहारिन् क्व यासि ।

वासन्ती—अयि देव राक्षसकुलप्रलयधूमकेतो किमद्यापि ते मन्युविषयः ।

सीता—अम्मो अहं वि उब्भन्तम्हि । [अहमप्युद्भ्रांतास्मि ।]

रामः—अन्य एवायमधुना विपर्ययो वर्तते ।

उपायानां भावादविरतविनोदव्यतिकरै-
र्विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः ।
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्
कथं तूष्णीं सह्यो निरवधिरयं त्वप्रतिविधः ॥ ४४ ॥

सीता—णिरवधित्ति हा हदम्हि मन्दभाइणी । [निरवधिरिति हा हतास्मि मन्दभागिनी ।]

रामः—हा कष्टम् ।

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा
प्रज्ञा जाम्बवतोपि यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये क्वासि मे ॥ ४५ ॥

सीता—बहुमण्णाविदम्हि तं पुव्वविरहं । [बहुमानितास्मि तं पूर्वविरहम् ।]

रामः—सखि वासन्ति दुःखायैव सुहृदामिदानीं रामस्य दर्शनम् । कियच्चिरं त्वां रोदयिष्यामि । [तदनुजानीहि मां गमनाय ।]

सीता—(सोद्वेगमोहं तमसामाश्लिष्य) भअवदि तमसे गच्छदि दाणिं अज्जउत्तो । (इति मूर्च्छति) [भगवति तमसे गच्छतीदानींमार्यपुत्रः ।]

तमसा—वत्से समाश्वसिहि समाश्वसिहि । नन्वावामायुष्मतोः कुशलवयो-र्वर्षवर्धनमङ्गलानि सम्पादयितुं भागीरथीपदान्तिकमेव गच्छावः ।

सीता—भअवदि पसीद । खणमेत्तं वि दाव दुल्लहदंसणं जणं पेक्खामि । [भगवति प्रसीद । क्षणमात्रमपि तावद्दुर्लभदर्शनं जनं प्रेक्षे ।]

रामः—अस्ति चेदानीमश्वमेधायसहधर्मचारिणी मे ।

सीता—(सोत्कम्पम्) अज्जउत्त का । [आर्यपुत्र का ।]

रामः—हिरण्मयी सीताप्रतिकृतिः ।

सीता—(सोच्छ्वासास्रम् ।) अज्जउत्तो दाणिं सि तुमं । अम्महे उक्खाणिदं दाणिं मे परिच्चाअलज्जासल्लं अज्जउत्तेण । [आर्यपुत्र इदानीमसि त्वम् । अहो उत्खातमिदानीं मे परित्यागलज्जाशल्यमार्यपुत्रेण ।]

रामः—तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि ।

Rama—(Rising excitedly). Ha ! Villain, that robs me of Sita, slaying Jatayu ! Where can you go ?

Vasanti—My lord, O the comet of distruction to the race of the demons. does the object of your wrath exist even now ?

Sita—Alas I am greatly distracted.

Rama—Quite strange is my present changed condition.

The former separation from the fair—eyed was marked by the existence of remedies, by encounters of warriors, which struck the world with astonishment; by incidents which provided endless amusement. It was to last only up-to the destruction of the enemy. But how can this unending and irremediable separation be borne in silence? (44)

Sita—That it is endless makes me (a wretched woman) dispair.

Rama—Oh misery !

What place holds thee my beloved ? A place which baffals my alliance with the lord of monkeys, where the prowess of the monkeys has no scope, where the wisdom of Jambavata is fruitless, a place inaccessible even to the son of the wind (Maruti), a place to which no road constructed by Nala, the son of Vishvakarma, can lead; a place beyond the reach of the arrows of Lakshmana? (45)

Sita—I feel greatly flattered with respect to the former separation, at the present moment.

Rama—Friend Vasanti ! The company of Rama is only painful to his friends. How long should I be the cause to make you weep ? Permit me to go.

Sita—(With emotion and bewilderment embraces Tamasa.) Revered Tamasa, my lord is now leaving. (Faints).

Tamasa—Dear child. take courage, take courage. We too have to go to the feet of the river Bhagirathi to perform the auspicious ceremony of the birth-day rites of the longlived Kusha and Lava.

Sita—Revered lady, be pleased. Let me behold, though for a moment, the person whose sight it is not easy to obtain.

Rama—I have now a companion who can associate with me in the performance of the Ashvamedh.

Sita—(With excitement) Who, my noble lord ?

Rama—A golden image of Sita.

Sita—(Breathing a sigh of relief ; with tears.)

How noble, my lord ! My lord has now uprooted the dart of shame arising from repudiation.

Rama—Let me now comfort my tearful eyes by looking at that

सीता—धण्णा सा जा एव्वं अज्जउत्तेण बहुमण्णीअदि जा अ अज्जउत्तं विणोदअन्दी आसाणिबन्धणं जादा जीअलोअस्स । [धन्या सा यैवमार्यपुत्रेण बहु मन्यते या चार्यपुत्रं विनोदयन्त्याशानिबन्धनं जाता जीवलोकस्य ।]

तमसा—(सस्मितस्नेहास्रं परिष्वज्य) अयि वत्से एवमात्मा स्तूयते ।

सीता—(सलज्जमधोमुखी स्वगतम्) परिहासिदह्मि भअवदीए । [परिहसितास्मि भगवत्या ।]

वासन्ती—महानयं व्यतिकरोऽस्माकं प्रसादः । गमनं प्रति यथा कार्यहानिर्न भवति तथा कार्यम् ।

सीता—पडिऊला दाणिं मे वासन्दी संवुत्ता । [प्रतिकूलेदानीं मे वासन्ति संवृत्ता ।]

तमसा—वत्से एहि गच्छावः ।

सीता—(सकष्टम्) एव्वं करेह्म । [एवं कुर्वः ।]

तमसा—कथं वा गम्यते । यस्यास्तव

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः ।
मर्मच्छेदोपमैर्यत्नैः संनिकर्षो निरुध्यते ॥ ४६ ॥

सीता—णमो णमो अपुव्वपुण्णजणिददंसणाणं अज्जउत्तचलणकमलाणं । [नमो नमोऽपूर्वपुण्यजनितदर्शनाभ्यामार्यपुत्रचरणकमलाभ्याम्] । (इति मूर्च्छति)

तमसा—वत्से समाश्वसिहि समाश्वसिहि ।

सीता—(समाश्वस्य ।) किअच्चिरं वा मेहन्तरेण पुण्णिमाचन्दस्स दंसणं । [कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनम् !]

तमसा—अहो संविधानकम् ।

एको रसः करुण एव निमित्तभेदा-
द्भिन्नः पृथक्पृथगिवाश्रयते विवर्तान् ।
आवर्तबुदबुदतरङ्गमयान्विकारा-
नम्भो यथा सलिलमेव हि तत्समस्तम् ॥ ४७ ॥

Sita—Blessed is she that is highly esteemed by my noble lord; who pleases my lord and is at once the hope and the support of the world.

Tamasa—(embraces her with affectionate tears.)

Oh my child, speaking thus thou but praisest thyself.

Sita—(With her head bent bashfully, to herself.)

I am laughed at by the revered Tamasa.

Vasanti—This meeting is a great favour. As for your departure, act in such a way as to prevent any neglect of duty.

Sita—Vasanti is not now favourably disposed towards me.
Tamasa—My child, come, we must go.
Sita—(Sorrowfully) Let us do so.
Tamasa—But how canst thou go ?

The contact of thy eye (sight) which is fixed on thy beloved, which is wide open through longing, can be broken only with heart-rending efforts. (46)

Sita—I bow to the lotus-like feet of my lord, over and over again; only extraordinary merit can procure the sight of them. (She faints).

Tamasa—Child take heart, take heart.

Sita—(Recovering) How long can one expect to hehold the full moon through an opening in the clouds ?

Tamasa—How wonderful is the chain of events !

It is one and the same sentiment of pathos; only it assumes various forms owing to the difference in the exciting cause; just as water takes the forms of eddies bubbles and waves and yet it is water all the same. (47).

रामः—अयि विमानराज इत इतः।

(सर्वे उत्तिष्ठन्ति)

तमसावासन्त्यौ—(सीतारामौ प्रति ।)

अवनिरमरासिन्धुः सार्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता।
स च मुनिरनुयातारुन्धतीको वसिष्ठ-
स्त्वयि वितरतु भद्रं भूयसे मङ्गलाय॥ ४८ ॥

(इति निष्क्रान्ताः सर्वे ।)

॥ तृतीयोऽङ्कः ॥

Rama—O best of balloons, come here.

(All rise)

Tamasa and Vasanti (To Sita and and Rema respectively)- May the earth, the river of gods, together with divinities like ourselves, the revered preceptor of your family, the originator of the metrical form, and the sage Vasishtha accompanied by Arundhati, bestow upon you blessings for your future welfare.

(Exeunt all)

[**End of the Third Act.**]

॥ चतुर्थोऽङ्कः ॥

(ततः प्रविशतस्तापसौ ।)

एकः—सौधातके दृश्यतामद्य भूयिष्ठसन्निधापितातिथिजनस्य समधिकारम्भरमणयिता भगवतो वाल्मीकेराश्रमपदस्य । तथाहि ।

नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूताप्रिया-
पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति ।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यते ॥ १ ॥

सौधातकिः—साअदं अणेअपिआराणं जिण्णकुच्छाणं अणज्झाअकालणाणं । [स्वागतमनेकप्रकाराणां जीर्णकूर्चानामनध्यायकारणानाम् ।]

प्रथमः—(विहस्य ।) अपूर्वः कोऽपि ते बहुमानहेतुर्गुरुषु सौधातके ।

सौधातकिः—भो दण्डाअण किंणामहेओ एसो महन्तस्स ठविरसत्थस्स धुरंधरो अज्ज अदिही आअदो । [भो दाण्डायन किंनामधेय एष महतः स्थविरसार्थस्य धुरन्धरोऽद्यातिथिरागतः ।]

दाण्डायनः—धिक्प्रहसनम् । नन्वयमृष्यशृङ्गाश्रमादरुन्धतीपुरस्कृतान् महाराजदशरथस्य दारानधिष्ठाय भगवान्वसिष्ठः प्राप्तः । तत्किमेवं प्रलपसि ।

सौधातकिः—हुं वसिट्ठो । [हुं वसिष्ठः ।]

दाण्डायनः—अथ किम् ।

सौधातकिः—मए उण जाणिदं वग्घो वा विओ वा एसोत्ति । [मया पुनर्ज्ञातं व्याघ्रो वा वृको वैष इति ।]

दाण्डायनः—आः किमुक्तं भवति ।

सौधातकिः—जेण परावाडिदेण जेव्व सा वराई कविला कल्लाणी मडमडाइआ । [येन परापतितेनैव सा वराकी कपिला कल्याणी मडमडायिता ।]

दाण्डायनः—समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः । तं हि धर्मं धर्मसूत्रकाराः समामनन्ति ।

ACT IV.

The First—Saudhataki just see how delightful is the appearance of the hermitage of the revered Valmiki, today; this is due to the elaborate preparations made for the guests that have assembled here in large numbers. For,

> This deer of the hermitage drinks to its fill the warm and sweet watery portion of the boiled Nivar corn, which is left over after its recently delivered, mate, had her meal. The flavour of the vegetables mixed with jujube berries, as they are being cooked, has spread all over; this flavour is again slightly mixed up with the strong smell of rice cooked with ghee. (1)

Saudhataki—Welcome to these grey-beards of various descriptions; they have been the cause of a holiday.

The First—(Laughing) Your reasons for your regard for the elders are novel indeed!

Saudhataki—Ho! Dandhayan! What's the name of this guest that heads the big caravan of old folk?

Dandayan—Enough of your jokes. It is revered Vasishtha who has arrived to day from the hermitage of Rshyasrnga and is accompanied by the queens of His Majesty king Dasratha, with Arundhati at their head. Why do you prattle like this?

Saudhataki—Ah! Vasishtha?

Dandayan—Certainly.

Saudhataki—I however thought that it was some tiger or a wolf.

Dandayan—What do you mean?

Saudhataki—Why, the moment he arrived he devoured that poor tawny calf.

Dandayan—Out of respect for the holy text that "Madhuparka should be accompanied with a dish of flesh," householders offer a heifer, a big bull or a goat to a learned brahmin coming as a guest, and the writers of law enjoin this as a duty.

सौधातकिः—भो णिगिहीदोसि । [भो निगृहीतोऽसि ।]

दाण्डायनः—कथमिव ।

सौधातकिः—जेण आअदेसु वसिट्ठमिस्सेसु वच्छदरी विससिदा । अज्ज जेव्व पच्चाअदस्स राएसिणो जणअस्स भअवदा वम्मीइणा दहिमहूहिं जेव्व णिव्वत्तिदो महुवक्को । वच्छतरी उण विसज्जिदा । [येनागतेषु वसिष्ठमिश्रेषु वत्सतरी विशासिता । अद्यैव प्रत्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिना दधिमधुभ्यामेव निर्वर्तितो मधुपर्कः । वत्सतरी पुनर्विसर्जिता ।]

दाण्डायनः—अनिवृत्तमांसानामेवं कल्पमृषयो मन्यन्ते । निवृत्तमांसस्तु तत्रभवान् जनकः ।

सौधातकिः—किंणिमित्तं । [किंनिमित्तम्]

दाण्डायनः—स तदैव देव्याः सीतायास्तादृशं दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः । तथास्य कतिपये संवत्सराश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य ।

सौधातकिः—तदो किंत्ति आअदो । [ततः किमित्यागतः ।]

दाण्डायनः—चिरन्तनप्रियसुहृदं भगवन्तं प्राचेतसं द्रष्टुम् ।

सौधातकिः—अवि अज्ज संबन्धिणीहिं समं संवुत्तं से दंसणं ण वेत्ति । [अप्यद्य सम्बन्धिनीभिः समं संवृत्तमस्य दर्शनं न वेति ।]

दाण्डायनः—संप्रत्येव भगवता वसिष्ठेन देव्याः कौसल्यायाः सकाशं भगवत्यरुन्धती प्रहिता यत्स्वयमुपेत्य वैदेहो द्रष्टव्य इति ।

सौधातकिः—जह एदे ठविरा परप्परं मिलिदा तह अह्मे वि वडुहिं सह मिलिअ अणज्झाअमहुस्सवं खेलन्तो मणेम्ह । अह कुत्थ सो जणओ । (इति परिक्रामतः ।) [यथैते स्थविराः परस्परं मिलितास्तथावामपि बटुभिः सह मिलित्वानध्यायमहोत्सवं खेलन्तो मानयावः । अथ क्व स जनकः ।]

दाण्डायनः—तथायं ब्रह्मवादी पुराणराजर्षिर्जनकः प्राचेतसवसिष्ठावुपास्य संप्रत्याश्रमस्य बहिर्वृक्षमूलमधितिष्ठति । य एषः

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते ।
अन्तःप्रसृप्तदहनो जरन्निव वनस्पतिः ॥ २ ॥

(इति निष्क्रान्तौ ।)

मिश्रविष्कम्भः ।

Saudhataki—O you are caught.

Dandayan—How so ?

Saudhataki—For, when the revered Vasishtha arrived, a heifer was slaughtered. But today when the royal sage Janak came, the revered Valmiki offered the Madhuparka with simple curds and honey, while he let off the heifer.

Dandayan—The sages enjoin this mode of reception only in the case of those who have not renounced meat; but revered Jenaka has abstained from flesh.

Saudhataki—For what reason?

Dandayan—The moment he heard of the sad calamity that befell Sita he took to the life of an anchorite and it is some years since he has been practising religious austerities in the penance grove of Chandradwipa.

Saudhataki—Why then does he come here ?

Dandayan—To meet his old friend revered Valmiki.

Saudhataki—Has he then had an interview to-day with his relations ?

Dandayan—It was only just now that the venerable Vasishtha sent revered Arundhati to Kausalya to say "Thou must come in person and see the King of Videhas."

Saudhataki—Just as these old people have met together, let us meet aud celebrate this holiday in play. Where then is Janaka ? (They walk about).

Dan—Here is the old royal sage Janaka, the expounder of Brahma. He is sitting at the bottom of a tree outside the hermitage, after paying his respects to Valmiki and Vasishtha.

He is incessently tormented with grief for Sita,
like a tree, with fire, lurking within.

(Exeunt).

(End of mixed Vashkambhaka.)

[ततः प्रविशति जनकः ।]

जनकः—अपत्ये यत्तादृद्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता ।
पटुर्धारावाही नव इव चिरेणापि हि न मे
निकृन्तन्मर्माणि क्रकच इव मन्युर्विरमति ॥ ३ ॥

कष्टं एवं नाम जरया दुःखेन च दुरासदेन भूयः पराकसान्तपनप्रभृतिभि-स्तपोभिरात्तरसधातुरनवष्टम्भो नाद्यापि मम दग्धदेहः पतति । अन्धतामिस्रा ह्यसूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते । अनेकसंवत्सरातिक्रमेऽपि प्रतिक्षणपरिभावनास्पष्टनिर्भासः प्रत्यग्र इव न मे दारुणो दुःखसंवेगः प्रशाम्यति । अयि मातर्देवयजनसम्भवे सीते ईदृशस्ते निर्माणभागः परिणतो येन लज्जया स्वच्छन्दमाक्रन्दितुमपि न शक्यते । हा पुत्रि भगवति वसुन्धरे सत्यमतिदृढासि ।

अनियतरुदितस्मितं विराज-
त्कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमञ्जु जल्पितं ते ॥४॥

भवति वसुन्धरे सत्यमति दृढासि ।

त्वं वह्निर्मुनयो वसिष्ठगृहिणी गङ्गा च यस्या विदु-
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः ।
विद्यां वागिव यामसूत भवती तद्वत्तु या दैवतं
तस्यास्त्वद्दुहितुस्तथा विशसनं किं दारुणेऽमृष्यथाः ॥५॥

(नेपथ्ये) इत इतो भगवतीमहादेव्यौ ।

जनकः—(दृष्ट्वा) अये गृष्टिनोपदिश्यमानमार्गा भगवत्यरुन्धती । (उत्थाय) कां पुनर्महादेवीत्याह । (निरूप्य) हा हा कथमियं महाराज-दशरथस्य धर्मदाराः प्रियसखी मे कौसल्या । क एतत्प्रत्येति सैवेयमिति ।

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा ।
कष्टं बतान्यदिव दैववशेन जाता
दुःखात्मकं किमपि भूतमहो विपाकः ॥ ६ ॥

Janaka—

My grief, caused by the great calamity befallen on my child,–the grief which has wounded my heart, is severe and continuous—does not cease even after such a long time, is, as it were fresh, and cuts my vitals as if with a saw. (3)

How hard is fate! My wretched body, its essential elements dried up by age, by overpowering grief and by the practising of penances such as Parak, Shantapana and others does not fall off though its supports are thus removed.

The regions of darkness called Andhatamisra, where the sun never rises, are assigned to those who kill themselves, is the belief of the Rishis. The terrible agony, fresh even after so many years, its vivid presentation brought out by continual brooding, does not cease. O dear Sita, sprung from the sacrificial ground, such is the development of your life, that I cannot even weep freely through shame.

Alas! My child!

I do remember your lotus like face as a child; how beautiful it looked, with its smiles and tears appearing there without any cause; the face with its few tender bud like teeth, its sweet prattle faltering and meaningless. (4)

O revered Earth, you are very hard–hearted indeed.

How could thou, O cruel one, bear the destruction of thy daughter in that manner, thy daughter whose greatness is known to thyself, the fire, the sages, Vasishtha's wife and the Ganges, nay, even to the divine sun, the progenitor of Raghu's race. Thou thyself gavest birth to her who is no less than a goddess, as does the goddess of speech to learning. (4)

(Behind the curtain).

This way this way, worshipful lady and great queen.

Janaka—(Looking) Ha! The revered Arundhati; Grishti showing her the way! (rising up) But whom did he address as great queen? (observing). Ah! Ah! How is it? She is the devoted wife of the great King Dasaratha! Who could have believed that she is no other.

In the household of Dasaratha she was like a goddess of prosperity. But why this simile? She was the goddess of prosperity in person. Alas! By an adverse turn of fortune she is misery incarnate. Alas! What a consummation? (6)

य एव मे जनः पूर्वमासीन्मूर्तो महोत्सवः ।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम् ॥७॥

(ततः प्रविशत्यरुन्धती कौसल्या कञ्चुकी च ।)

अरुन्धती—ननु ब्रवीमि द्रष्टव्यः स्वयमुपेत्यैव वैदेह इत्येष वः कुलगुरोरादेशः । अत एव चाहं प्रेषिता । तत्कोऽयं पदे पदे महाननध्यवसायः ।

कञ्चुकी—देवि संस्तभ्यात्मानमनुरुध्यस्व भगवतो वसिष्ठस्यादेशमिति विज्ञापयामि ।

कौसल्या—ईरिसे काले मिहिलाहिवो मए दिट्ठव्वो त्ति समं जेव्व सव्वाइं दुक्खाइं समुब्भवन्ति । ता ण सक्कुणोमि उव्वट्टमाणमूलबन्धणं हिअअं पज्जवत्थावेदुम् । [ईदृशे काले मिथिलाधिपो मया द्रष्टव्य इति सममेव सर्वाणि दुःखानि समुद्भवन्ति । तन्न शक्नोम्युद्वर्तमानमूलबन्धनं हृदयं पर्यवस्थापयितुम् ।]

अरुन्धती—अत्र कः सन्देहः ।

सन्तानवाहीन्यपि मानुषाणां
दुःखानि सम्बन्धिवियोगजानि ।
दृष्टे जने प्रेयसि दुःसहानि
स्रोतःसहस्रैरिव संप्लवन्ते ॥८॥

कौसल्या—कहं णु खु वच्छाए वहूए एवं गदे तस्सा पिदुणो राएसिणो मे मुहं दंसइस्स । [कथं तु खलु वत्साया वध्वा एवं गते तस्याः पित्रे राजर्षये मे मुखं दर्शयामः ।]

अरुन्धती—एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः ।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥९॥

कौसल्या—एसो सो महाराअस्स हिअअणिव्विसेसो वच्छाए मे वहूए पिदा राएसी सीरद्धओ । हद्धी हद्धी सुमारिदह्मि अणिव्वेदरमणीए दिअसे । हा देव्व सव्वं तं णत्थि । [एष स महाराजस्य हृदयानिर्विशेषो वत्साया मे वध्वाः पिता राजर्षिः सीरध्वजः । हा धिक् हा धिक् स्मारितास्मि अनिर्वेदरमणीयान्दिवसान् । हा दैव सर्वं तन्नास्ति ।]

जनकः—(उपसृत्य) भगवत्यरुन्धति वैदेहः सीरध्वजोऽभिवादयते ।

The sight of the person who was to me a festival incarnate, has now become unbearable like salt on a wound. (7)

(Then enter Arundhati, Kausalya and Chamberlain).

Arundhati—I say, "The command of your family preceptor is that you must go in person and meet the king of the Videhas. For this very reason I have been sent here. Why then this hesitation at every step?"

Chamberlain—I beg of you, o queen, that you should control yourself and carry out the behest of the revered Vasishtha.

Kausalya—The thought of beholding the lord of Mithila at this juncture makes all my sorrows break forth once more. I cannot compose my heart; the very roots of my heart are being snapped.

Arundhati—What doubt can there be in it?

The grief of men caused by separation from relations, though its flow be continuous, becomes unbearable and bursts forth in a thousand streams at the sight of a dear person. (8)

Kausalya—How can I show my face to the royal sage, the father of my daughter-in-law, after what has happened to her?

Arundhati—Here is your worthy relation, the foremost of the house of Janaka, to whom the sage Yajnavalkya expounded the knowledge of the supreme being. (9)

Kausalya—Here is the royal saint Janaka, the father of my daughter-in-law, the second soul of the great king. Alas! Alas! I am put in mind of those delightful days that knew no dejection. O fate! All that is no more.

Janaka—(Approaching) Revered Arundhati, the ploughbannered Janaka of Videhas bows to you.

यया पूतंमन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः ।
त्रिलोकीमङ्गल्यामवनितललीनेन शिरसा
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ॥ १० ॥

अरुन्धती—अक्षरं ते ज्योतिः प्रकाशताम् । स त्वां पुनातु देवः परो रजसां य एष तपति ।

जनकः—आर्यं गृष्टे अप्यनामयमस्याः प्रजापालकस्य मातुः ।

कञ्चुकी—(स्वगतम्) निरवशेषमतिनिष्ठुरसुपालब्धाः स्मः । (प्रकाशम्) राजर्षे अनेनैव मन्युना चिरपरित्यक्तरामभद्रमुखचन्द्रदर्शनां नार्हसि दुःखयितुमतिदुःखितां देवीम् । रामभद्रस्यापि दैवदुर्योगः कोऽपि । यत्किल समन्ततः प्रवृत्तबीभत्साकिंवदन्तीकाः पौरजानपदा नाग्निशुद्धिमनल्पकाः प्रतियन्तीति दारुणमनुष्ठितं देवेन ।

जनकः—(सरोषम्) आः कोऽयमग्निर्नामास्मत्प्रसूतिपरिशोधने । कष्टमेवंवादिना जनेन रामभद्रपरिभूता अपि वयं पुनः परिभूयामहे ।

अरुन्धती—(निश्वस्य ।) एवमेतत् । अग्निरिति वत्सां प्रति परिलघून्यक्षराणि । सीतेत्येव पर्याप्तम् । हा वत्से

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति ।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥११॥

कौसल्या—अहो उम्मीलन्ति वि अ वेअणाओ । [अहो उन्मीलन्तीव वेदनाः ।] (इति मूर्छति)

जनकः—हा कष्टं किमेतत् ।

अरुन्धती—राजर्षे किमन्यत् ।

स राजा तत्सौख्यं स च शिशुजनस्ते च दिवसाः
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम् ।
विपाके घोरेऽस्मिन्नथ खलु विमूढा तव सखी
पुरंध्रीणां चित्तं कुसुमसुकुमारं हि भवति ॥१२॥

